-: ऋणमोचनमङ्गलस्त्रोत्रम् :-

विनियोगः — ॐ अस्य श्री भौम स्त्रोत्रस्य श्रीगर्ग ऋषिः । त्रिष्टुप् छन्दः मङ्गलो देवता । ऋण हरणे धन प्राप्त्यर्थे च विनियोगः ।

ऋष्यादिन्यास :— ॐ श्रीगर्ग ऋषये नमः शिरसी । ॐ त्रिष्टुप् छन्दसे नमः मुखे। ॐ मङ्गल देवतायै नमः हृदि । ॐ ऋण हरणे धन प्राप्त्यर्थे च विनियोगाय नमः अञ्जलौ।

—: अथ ध्यानम् :—

रक्ताम्बरो रक्तवपु: किरीट, चतुर्भुजो मेषगदो गदाभृत् ।

धरासत: शक्तिधरश्र्च शूली, सदा मम स्याद् वरदः प्रशान्त: ।।

—: अथ स्त्रोत्रम् :—

ॐ मङ्गलो भूमिपूत्रश्र्च ऋणहर्ता धनप्रद: ।

स्थिरासनो महाकाय: सर्वकर्मावरोधक: ।।१।।

लोहितो लोहितांक्षश्र्च सामगानां कृपाकर: ।

धरात्मज: कुजो भौमो भूतिदो भूमिनन्दन।।२।।

अङ्गारको यमश्चैव सर्वरोगापहारक: ।

वृष्टे: कर्ताऽपहर्ता च सर्वकामफलप्रद:।।३।।

एतानि कुजनामानि नित्यं य: श्रद्धया पठेत् ।

ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ।।४।।

धरणी गर्भसम्भूतं विद्युत्कान्ति समप्रभम् ।

कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ।।५।।

स्त्रोत्रमङ्गारकस्यैतत् पठनीयं सदा नृभि: ।

न तेषां भौमजा पीड़ा स्वल्पाऽपि भवति क्वचित्।।६।।

अङ्गारक महाभाग भगवन् भक्तवत्सल।

त्वां नमामि ममाऽशेष मृणमाशु विनाशय।।७।।

ऋण रोगादि द्रारिद्र्यं ये चाऽन्ये ह्यपमृत्यव: ।

भय क्लेश मनस्तापा नश्यन्तु मम सर्वदा।।८।।

अतिवक्र दुराराध्य भोगमुक्तजितात्मन: ।

तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात्।।९।।

विरिञ्चि शक्र विष्णुनां मनुष्याणां तु का कथा।

तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबल: ।।१०।।

पुत्रान् देहि धनं देहि त्वामस्मि शरणं गत: ।

ऋण दारिद्र्य दु:खेन शत्रुणां च भयात्तत: ।।११।

एभिर्द्वादशभि: श्लोकैर्य: स्तौति च धरासुतम् ।

महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ।।१२।।

इति श्रीस्कन्दपुराणे श्रीभार्गवप्रोक्तम् ऋणमोचनमङ्गल स्त्रोत्रम् सम्पूर्णम् ।।